घातयन्ति स्वमात्मानं चण्डालादिहताश्च ये ।
तेषां पुत्त्राश्च पौत्त्राश्च दयया समभिप्लुताः ।
यच्च श्राद्धं प्रतन्वन्ति विष्णुनामप्रतिष्ठितं ॥
तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवे" ।
इति हेमाद्रौ वृद्धशातातपेनोक्तम् ।
"आत्मनो घातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयं ।
तप्तकृच्छ्रचतुष्कञ्च त्रिंशत् कृच्छ्राणि वा पुनः ॥
अर्व्वाक् संवत्सरात् कुर्य्याद्दहनादि यथोदितं ।
कृत्वा नारायणबलिमनित्यत्वात्तदायुषः" ॥
इदञ्चात्मवधनिमित्तं तज्जातिवधप्रायश्चित्तेन समुचितं कार्य्यम् । इति निर्णयसिन्धौ ५ परिच्छेदः ॥ अन्यत् पतितशब्दे द्रष्टव्यम् ॥ * ॥ आत्मत्यागिषु विशेषमाह गौतमः । "प्रायोऽनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छताम्" इति । प्रायो महाप्रस्थानं । अनाशकमनशनं । प्रपतनं शैलशिखरादवपातनं । इत्यादिनिमित्तैः शास्त्राविहितमार्गेण इच्छापूर्व्वकमृतानामशौचादिकं न कर्त्तव्यमित्यर्थः । अङ्गिराः ।
"चाण्डालादुदकात् सर्पात् ब्राह्मणाद्वैद्युतादपि ।
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्म्मिणां ॥
उदकं पिण्डदानञ्च प्रेतेभ्यो यत् प्रदीयते ।
नोपतिष्ठति तत्सर्व्वं अन्तरीक्षे विनश्यति" ॥
यथा मनुः ।
"वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठतां ।
आत्मनस्त्यागिनां चैव निवर्त्ततोदकक्रिया" ॥
वृथासङ्करजातानामिति वृथाजाताः पञ्चमहायज्ञादिरहिताः । सङ्करजाताः प्रतिलोमजाः ॥ * ॥ प्रमादात् पूर्व्वोक्तनिमित्तैर्म्मरणे विद्यते एवाशौचादिकं । अतएवाङ्गिराः ।
"अथ कश्चित् प्रमादेन म्रियेताग्न्युदकादिभिः ।
तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया" ॥
चाण्डालादिमृताहिताग्नेरग्न्यादीनां प्रतिपत्तिकर्म्म च स्मृत्यन्तरेऽभिहितं ।
"वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे ।
पात्राणि तु दहेदग्नौ यजमाने वृथामृते" ॥
वृथामृतः अविहितमार्गेण मृतः । तथा,—
"आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया ।
तेषामपि च गङ्गायास्तीरे संस्थापनं मतं" ॥
गङ्गेति पुण्यनद्युपलक्षणं ॥ * ॥ एवं पूर्व्वोक्तनिन्दितमरणे मृतानां स्नेहादिनाशाद्यौर्द्ध्वदेहिककरणे स्मृत्यन्तरे प्रायश्चित्तमाम्नातं ।
"कृत्वाग्निमुदकं स्नानं स्पर्शनं वहनं तथा ।
"रज्जुच्छेदाश्रुपातञ्च तप्तकृच्छ्रेण शुद्ध्यति" ॥ इति ।
एतच्च बुद्धिपूर्व्वे प्रत्येकमग्न्यादिकरणे ॥
अबुद्धिपूर्व्वके तु संवर्त्तः ।
"एवामन्यतमं प्रेतं यो वहेत दहेत वा ।
कटोदकक्रियां कृत्वा कृच्छ्रं सान्तपनं चरेत्" ॥
अत्र सुमन्त्वादिर्मासं भैक्ष्याहारस्त्रिसवनञ्च ।
तथा एकरात्राभोजनादिकं चाभिहितं तदशक्तविषये देशकालाद्यपेक्षानुसारेण योजनीयं ॥ * ॥
यस्तु वृद्धादिर्लुप्तभिषक्क्रियस्तस्यात्महननमप्यनुज्ञातमादिपुराणे ।
"वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वन्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः ।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमारभेत्" ॥
तथा,—
"गच्छेत् महापथं वापि तुषारगिरिमादरात् ।
प्रयागे वटशाखायां देहत्यागं करोति यः ॥
स्वयं देहविनाशस्य काले प्राप्ते महामतिः ।
उत्तमान् प्राप्नुयाल्लोकान्नात्मघाती भवेत् क्वचित् ॥
एतेषामधिकारस्तु सर्व्वेषां सर्व्वजन्तुषु ।
नराणामथ नारीणां सर्व्ववर्णेषु सर्व्वदा ॥
अशौचं स्यात् त्र्यहं तेषां वज्रानलहतेषु च ।
वाराणस्यां म्रियेद्यस्तु प्रत्याख्यातभिषक्क्रियः ॥
प्रणवं तारकं ब्रूते नान्यथा कस्यचित् क्वचित्" ।
विवस्वान् ।
"सर्व्वेन्द्रियविमुक्तस्य स्वव्यापाराक्षमस्य च ।
प्रायश्चित्तमनुज्ञातमग्निपातो महापथः" ॥
धर्म्मार्ज्जनासमर्थस्य द्वादशवार्षिकादिरूपप्रायश्चित्तासमर्थस्य । एवं शास्त्राविहितमार्गेण मृतानां चाण्डालादिमृतानां संवत्सरादूर्द्ध्वमौर्द्ध्वदेहिकं कार्य्यं । षट्त्रिंशन्मते ।
"गोब्राह्मणहतानाञ्च पतितानां तथैव च ।
ऊर्द्ध्वं संवत्सरात् कुर्य्यात् सर्व्वमेवौर्द्ध्वदेहिकं" ॥ * ॥
अत्रापरं विशेषमाह पराशरः ।
"चाण्डालेन श्वपाकेन गोभिर्व्विप्रैर्हतो यदि ।
आहिताग्निर्मृतो विप्रो विशेषेणात्मघातकः ॥
दहेत ब्राह्मणं विप्रो लोकाग्नौ मन्त्रवर्ज्जितं ।
दग्ध्वास्थीनि पुनर्गृह्य क्षीरेण क्षालयेत्ततः ॥
स्वेनाग्निना स्वमन्त्रेण पृथगेतत् पुनर्द्दहेत्" ॥ * ॥
संवत्सरादर्व्वागपि तत्तत्पापानुसारेण द्विगुणादिप्रायश्चित्तं विधाय नारायणबलिञ्च कृत्वा और्द्ध्वदेहिकं कार्य्यं । आयुषोऽनित्यत्वेन संवत्सरानन्तरमौर्द्ध्वदेहिकादिलोपप्रसङ्गात् । तत्र नारायणबलिं कृत्वा । तथा च वृद्धयाज्ञवल्क्यः ।
"नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेत् शौचं नान्यथेत्यब्रवीद्यमः" ॥
नारायणबलौ कृते और्द्ध्वदेहिककरणे भवतीत्यर्थः ॥ * ॥ सर्पहते तु विशेषः । संवत्सरं यावत् पञ्चम्यां नागपूजां विधाय तदनन्तरं नारायणबलिं कृत्वा सौवर्णनागं प्रत्यक्षां गाञ्च व्यासोद्देशेन ब्राह्मणाय दत्त्वा और्द्ध्वदेहिकं कुर्य्यात् ॥ * ॥
नारायणबलिस्वरूपञ्च विष्णुनाभिहितं ।
"एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिं ।
विष्णुं समर्च्चयेद्देवं यमं वैवस्वतं तथा ॥
दशपिण्डान् घृताभ्यक्तान् दर्भेषु मधुसंयुतान् ।
तिलमिश्रान् प्रदद्याद्वै संयतो दक्षिणामुखः ॥
विष्णुं बुद्धौ समासाद्य नद्यम्भसि ततः क्षिपेत् ।
नामगोत्रग्रहं कृत्वा पुष्पैरभ्यर्च्चनं ततः ॥
धूपदीपप्रदानञ्च भक्ष्यभोज्यं तथापरं ।
विद्यातपःसमृद्धान् वै कुलोत्पन्नान् समाहितान् ॥
निमन्त्रयेत विप्रान् वै पञ्च सप्त नवापि वा ।
अपरेऽहनि सम्प्राप्ते मध्याह्ने समुपोषितः ॥
विष्णोरभ्यर्च्चनं कृत्वा विप्रांस्तानुपवेशयेत् ।
उदङ्मुखान् यथाज्येष्ठं पितृरूपमनुस्मरन् ॥
मनो निवेश्य विष्णौ वै सर्व्वं कुर्य्यादतन्द्रितः ।
आवाहनादि यत् प्रोक्तं दैवपूर्व्वं तदाचरेत् ॥
तृप्तान् ज्ञात्वा ततो विप्रस्तृप्तिं पृष्ट्वा यथाविधि ।
हविष्यव्यञ्जनेनैव तिलादिसहितेन च ॥
पञ्च पिण्डान् प्रदद्याच्च दैवरूपमनुस्मरन् ।
प्रथमं विष्णवे दद्यात् ब्रह्मणे च शिवाय च ॥
यमाय सानुसाराय चतुर्थं पिण्डमुत्सृजेत् ।
मृतं संकीर्त्त्य मनसा गोत्रपूर्व्वमतःपरं ॥
विष्णोर्नाम गृहीत्वैवं पञ्चमं पूर्व्ववत् क्षिपेत् ।
विप्रानाचम्य विधिवत् दक्षिणाभिः समर्च्चयेत् ॥
एकं वृद्धतमं विप्रं हिरण्येन समर्च्चयेत् ।
गवा वस्त्रेण भूम्या च प्रेतं तं मनसा स्मरेत् ॥
ततस्तिलाम्भो विप्रास्तु हस्तैर्द्दर्भसमन्वितैः ।
क्षिपेयुर्गोत्रपूर्व्वन्तु नाम बुद्धौ निवेश्य च ॥
हविर्गन्धतिलाम्भस्तु तस्मै दद्युः समाहिताः ।
मित्रभृत्यजनैः सार्द्धं पश्चाद्भुञ्जीत वाग्यतः" ॥
भविष्यपुराणे ।
"सुवर्णतारनिष्पन्नं नागं कृत्वा तथैव गां ।
व्यासाय दत्त्वा विधिवत् पितुरानृण्यमाप्नवान्" ॥
इति मदनपारिजाते ५ स्तवकः ॥

आत्मघोषः, पुं, (आत्मानं घोषयतीति । आत्मन् + घुष् + अण् ।) काकः । इत्यमरः ॥ कुक्कुटः । इति शब्दचन्द्रिका ॥

आत्मजः, पुं, (आत्मन् + जन् + डः । आत्मा वै जायते पुत्त्र इति श्रुतेः ।) पुत्त्रः । इत्यमरः ॥ मनुः, १७ । १४ ।
"तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्ममात्मजं" ।
यथा रामायणे,—
"दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजां" ॥)

आत्मजन्मा [न्] पुं, (आत्मनः जन्म यस्य सः बहुव्रीहिः ।) पुत्त्रः । इति शब्दरत्नावली ॥
यथा कुमारसम्भवे, ६ । २८ ।
"अत आहर्त्तुमिच्छामि पार्व्वतीमात्मजन्मने" ।
यथा रघुवंशे, १ । ३३ ।
"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः" ॥)

आत्मजा, स्त्री, (आत्मन् + जन् + ड + टाप् ।) कन्या । इत्यमरः ॥ बुद्धिः । इति शब्दरत्नावली ॥

आत्मतत्त्वं, क्ली, (आत्मनः तत्त्वं स्वरूपम् ।) तत्त्वज्ञासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मतत्त्वं । पुत्त्रादिभासकं नित्यशुद्धत्वादिस्वरूपमेवात्मवस्त्विति यावत् । एतद्विवरणं यथा । "इदानीं प्रत्यगात्मनि इदमिदमयमयमारोपयतीति विशेष उच्यते । तथाच । अतिप्राकृतस्तु आत्मा वै जायते पुत्त्र इत्यादि श्रुतेः स्वस्मिन्निव स्वपुत्त्रेऽपि प्रेमदर्शनात् पुत्त्रे पुष्टे नष्टेऽहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्त्र आत्मेति वदति ॥ १ ॥ चार्व्वाकस्तु स वा एष पुरुषोऽन्नरसमय इत्यादि श्रुतेः प्रदीप्तगृहात् स्वपुत्त्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं कृशोऽहं इत्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति ॥ २ ॥ अपरश्चार्व्वाकः तेऽप्राणाः प्रजापतिं समेत्य ब्रूयु